# 2022

## SANSKRIT — GENERAL

**Paper : SEC-A-2**

**(Basic Elements of Āyurveda)**

**Full Marks : 80**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

1. अधःप्रदत्तेषु प्रश्नेषु यथेच्छं ***पञ्चानाम्*** उत्तरं संस्कृतभाषया देवनागरलिप्या च लिख्यताम्। 2×5

(a) किं नाम आयुर्वेदः? तत्प्रयोजनं किम्? आयुः कतिविधम्?

(b) वाजीकरणं किम्? अङ्गस्यास्य कस्यचिद्वैद्यस्य नाम लेख्यम्।

(c) आयुर्वेदस्य कति विभागाः सन्ति? पशूनां कुत्र अन्तर्भावः?

(d) आयुर्वैदिकसम्प्रदाये 'वृद्धत्रयी' इति प्रसिद्धाः ग्रन्थाः के? के च ग्रन्थकर्तारः?

(e) भेलसंहितायां कस्याः चिकिस्यायाः विधानम् अस्ति? संहिताकारः कस्य सम्प्रदायस्य कस्य महर्षेश्च शिष्यः?

(f) चक्रपाणिदत्तस्य कति कृतयः सन्ति? सुश्रुतसंहितायाः टीकायाः (चक्रपाणिदत्तकृतायाः) नाम किम्?

(g) आयुर्वैदिकसम्प्रदाये के ग्रन्थाः लघुत्रय्याम् अन्तर्भुक्ताः? ग्रन्थकाराश्च के?

(h) 'कुमारतन्त्रम्', 'भेषजकल्पः' इति ग्रन्थद्वयस्य लेखकयोः नामोल्लेखः क्रियताम्।

(i) चरकसंहितायां कति स्थानानि सन्ति? तेषां नामानि लिख्यन्ताम्।

2. अधोलिखितेषु कयोश्चिद् ***द्वयोः*** परिचय लेखनीयः। 5×2

(a) सुश्रुतः

(b) वाग्भटः

(c) माधवः

(d) अग्निवेशः

(e) आत्रेयः।

Please Turn Over

3. अधस्तनश्लोकेषु यथेच्छं **त्रयाणां** वङ्गभाषया आङ्गलभाषया वा अनुवादः कर्तव्यः। 5×3

(a) सर्वमन्यत् परित्यज्य शरीरमनुपालयेत्।
तदभावे हि भावानां सर्वाभावः शरीरिणाम्॥

(b) नार्थार्थं नापि कामार्थमथ भूतदयां प्रति।
वर्तते यः चिकित्सायां स सर्वमतिवर्तते॥

(c) कुर्वते ये तु वृत्त्यर्थं चिकित्सापण्यविक्रयम्।
ते हित्वा काञ्चनं राशि पांशुराशिमुपासते॥

(d) श्रुते पर्यवदातत्वं बहुशो दृष्टकर्मता।
दाक्ष्यं शौचमिति ज्ञेयं वैद्ये गुणचतुष्टयम्॥

(e) हिताहितं सुखं दुःखमायुस्तस्य हिताहितम्।
मानञ्च तस्य यत्रोक्तमायुर्वेदः स उच्यते॥

(f) धर्मार्थं नार्थकामार्थमायुर्वेदो महर्षिभिः।
प्रकाशितो धर्मपरैरिच्छद्भिः स्थानमुत्तमम्॥

4. अधोलिखितेषु **कस्यचिदेकस्यैव** श्लोकस्य देवनागरलिप्या संस्कृतभाषया च व्याख्या कर्तव्या। 7×1

(a) समदोषः समाग्निश्च समधातुमलक्रियः।
प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते॥

(b) वायुः पित्तं कफश्चेति त्रयो दोषाः समासतः।
विकृताविकृता देहं घ्नन्ति ते वर्तयन्ति च॥

(c) तच्च नित्यं प्रयुञ्जीत स्वास्थ्यं येनानुवर्तते।
अजातानां विकाराणामनुत्पत्तिकरञ्च यत्॥

5. अधःप्रदत्तेषु **द्वयोः** टीका संस्कृतभाषया देवनागरलिप्या च लेखनीया। 4×2

(a) आयुर्वेदे 'चिकित्सा'।

(b) आयुर्वेदे 'वैद्यः'।

(c) आयुर्वेदानुसारं 'रोगः'।

(d) आयुर्वेदे सप्त धातवः।

(e) आयुर्वेद पथ्यापथ्यम्।

6. निम्नोद्धृतान् 7 संख्यक प्रश्नस्थितान् मन्त्रान् विहाय यथेच्छं तैत्तिरीयोपनिषदः कम**प्येकं** मन्त्रं देवनागरलिप्या लिखत। 10

7. अधोलिखितेषु ***द्वयोः*** मन्त्रयोः वङ्गभाषया आङ्गलभाषया वा अनुवादः कर्तव्यः। 5×2

(a) ॐ शं नो मित्रः शं वरुणः। शं नो भवत्वर्यमा। शं न इन्द्रो बृहस्पतिः। शं नो विष्णुरुरुक्रमः। नमो ब्रह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतु माम्। अवतु वक्तारम्।। ॐ शान्तिः शान्तिः शान्तिः।।

(b) "देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि तानि सेवितव्यानि। नो इतराणि। यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि। नो इतराणि।।"

(c) "अन्नाद्वै प्रजाः प्रजायन्ते। या काश्च पृथिवीं श्रिताः। अथो अन्नेनैव जीवन्ति। अथैनदपि यन्त्यन्ततः। अन्नं हि भूतानां ज्येष्ठम्। तस्मात्सर्वौषधमुच्यते।"

8. तैत्तिरीयोपनिषदः शीक्षावल्लीभागे समालोचितविषयाणां संस्कृतभाषया देवनागरलिप्या च संक्षेपेण विवरणं प्रस्तूयताम्। 10

***अथवा,***

संस्कृतभाषया देवनागरलिप्या च अधोलिखितयोः अन्यतरस्य सप्रसङ्गं व्याख्या विधीयताम्– 10

(a) "शीक्षां व्याख्यास्यामः। वर्णः स्वरः। मात्रा बलम्। साम संतानः। इत्युक्तः शीक्षाध्यायः।"

(b) "ब्रह्मविदाप्नोति परम्। तदेषाभ्युक्ता। सत्यं ज्ञानमनन्तं ब्रह्म। यो वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति।"

---